

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## प्रथमकाण्डे सप्तमः प्रश्नः

### याजमान ब्राह्मणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

पाकयज्ञव्ँवा अन्वाहिताग्नेः पशव उप तिष्ठन्त इडा खलु वै पाकयज्ञः सैषाऽन्तरा प्रयाजा-
नूयाजान्यजमानस्य लोकेऽवहिता तामाह्रियमाणामभि मन्त्रयेत सुरूपवर्षवर्ण एहीति पशवो
वा इडा पशूनेवोप ह्वयते यज्ञव्ँवै देवा अदुह्रन्यज्ञोऽसुराꣳ अदुहत् तेऽसुरा यज्ञदुग्धाः पराऽभवन्यो
वै यज्ञस्य दोहव्ँविद्वान् ॥ [१] ॥ यजतेऽप्यन्यय्ँयजमानन्दुहे सा मे सत्याऽऽशीरस्य यज्ञस्य
भूयादित्याहैष वै यज्ञस्य दोहस्तेनैवैनन्दुहे प्रत्ता वै गौर्दुहे प्रत्तेडा यजमानाय दुह एते वा इडायै
स्तना इडोपहूतेति वायुर्वथ्सो यर्हि होतेडामुपह्वयेत तर्हि यजमानो होतारमीक्षमाणो वायु-
म्मनसा ध्यायेन् ॥ [२] ॥ मात्रे वथ्समुपावसृजति सर्वेण वै यज्ञेन देवाः सुवर्गँल्लोकमायन्
पाकयज्ञेन मनुरश्राम्यथ्सेडा मनुमुपावर्तत तान्देवासुरा व्यह्वयन्त प्रतीचीन्देवाः पराचीमसुराः
सा देवानुपावर्तत पशवो वै तद् देवानवृणत पशवोऽसुरानजहुर्यङ्कामयेतापशुः स्यादिति परा-
चीन्तस्येडामुप ह्वयेतापशुरेव भवति यं ॥ [३] ॥ कामयेत पशुमान्थ् स्यादिति प्रतीचीन्तस्ये-
डामुप ह्वयेत पशुमानेव भवति ब्रह्मवादिनो वदन्ति स त्वा इडामुप ह्वयेत य इडा मुपहूयात्मा-
नमिडायामुपह्वयेतेति सा नः प्रिया सुप्रतूर्तिर् मघोनीत्याहेडामेवोपहूयाऽऽत्मान मिडायामुप
ह्वयते व्यस्तमिव वा एतद्यज्ञस्य यदिडा सामि प्राश्नन्ति ॥ [४] ॥ सामि मार्जयन्त एतत्
प्रति वा असुराणाय्ँयज्ञो व्यच्छिद्यत ब्रह्मणा देवाः समदधुर् बृहस्पति स्तनुतामिमन्न इत्याह ब्रह्म
वै देवानाम्बृहस्पतिर् ब्रह्मणैव यज्ञꣳ सन्दधाति विच्छिन्नय्ँयज्ञꣳ समिमन्दधात्वित्याह सन्तत्यै

विश्वे देवा इह मादयन्तामित्याह सन्तत्यैव यज्ञं देवेभ्योऽनु दिशति यावै ॥ [५] ॥ यज्ञे दक्षिणान्ददाति तामस्य पशवोऽनु सङ्क्रामन्ति स एष ईजानोऽपशुर् भावुको यजमानेन खलु वै तत्कार्यमित्याहुर् यथा देवत्रा दत्तङ्कुर्वीतात्मन् पशून् रमयेतेति ब्रद्ध्न पिन्वस्वेत्याह यज्ञो वै ब्रद्ध्नो यज्ञमेव तन्महयत्यथो देवत्रैव दत्तङ्कुरुत आत्मन् पशून् रमयते ददतो मे मा क्षायीत्या- हाक्षितिमेवोपैति कुर्वतो मे मोप दसदित्याह भूमानमेवोपैति ॥ [६] ॥

(विद्वान्ध्यायेद्भवति यंप्राङ्नन्तियावैमएकान्नविंशतिश्च) ॥ १ ॥

---

सऽंश्रवा ह सौवर्चनसः तुमिञ्जमौपोदितिमुवाच यथ्सत्रिणाः होताऽभूः कामिडामुपाह्वथा इति तामुपाह्व इति होवाच या प्राणेन देवान् दाधार व्यानेन मनुष्यानपानेन पितृनिति छिनत्ति सा न छिनत्ती(३) इति छिनत्तीति होवाच शरीरँव्वा अस्यै तदुपाह्वथा इति होवाच गौर्वा ॥ [७] ॥ अस्यै शरीरञ्जाँव्वाव तौ तत् पर्यवदतायँ्या यज्ञे दीयते सा प्राणेन देवान् दाधार यया मनुष्या जीवन्ति सा व्यानेन मनुष्यान् याम्पितृभ्यो घ्नन्ति साऽपानेन पितृन्य एवँव्वेद पशुमान् भवत्यथ वै तामुपाह्व इति होवाच या प्रजाः प्रभवन्तीः प्रत्याभवतीत्यन्नँव्वा अस्यै तदु ॥ [८] ॥ पाह्वथा इति होवाचौषधयो वा अस्या अन्नमोषधयो वै प्रजाः प्रभवन्तीः प्रत्या भवन्ति य एवँव्वेदान्नादो भवत्यथ वै तामुपाह्व इति होवाच या प्रजाः पराभवन्तीरनुगृह्णाति प्रत्याभवन्तीर् गृह्णातीति प्रतिष्ठाँव्वा अस्यै तदुपाह्वथा इति होवाचेयँव्वा अस्यै प्रतिष्ठे ॥ [९] ॥ यँव्वै प्रजाः पराभव- न्तीरनु गृह्णाति प्रत्याभवन्तीर् गृह्णाति य एवँव्वेद प्रत्येव तिष्ठत्यथ वै तामुपाह्व इति होवाच यस्यै निक्रमणे घृतम्प्रजाः सञ्जीवन्तीः पिबन्तीति छिनत्ति सा न छिनत्ती (३) इति न छिनत्तीति होवाच प्र तु जनयतीत्येष वा इडामुपाह्वथा इति होवाच वृष्टिर्वा इडा वृष्ट्यै वै निक्रमणे घृतम्प्रजाः सञ्जीवन्तीः पिबन्ति य एवँव्वेद प्रैव जायतेऽन्नादो भवति ॥ [१०] ॥

(गौर्वाअस्यै तत्प्रतिष्ठाऽह्वथा इतिविंशतिश्च) ॥ २ ॥

---

परोक्षँव्वा अन्ये देवा इज्यन्ते प्रत्यक्षमन्ये यद्यजते य एव देवाः परोक्षमिज्यन्ते तानेव तद्यजति यदन्वाहार्यमाहरत्येते वै देवाः प्रत्यक्षँय्यद् ब्राह्मणास्तानेव तेन प्रीणात्यथो दक्षिणै-

वास्यैषाऽथो यज्ञस्यैव छिद्रमपि दधाति यद्वै यज्ञस्य क्रूरय्यँद्विलिष्टन्तदन्वाहार्येण ॥ [११] ॥ ऽन्वाहरति तदन्वाहार्यस्यान्वाहार्यत्वन्देवदूता वा एते यदृत्विजो यदन्वाहार्यमाहरति देवदूता-नेव प्रीणाति प्रजापतिर् देवेभ्यो यज्ञान् व्यादिशथ् स रिरिचानोऽमन्यत स एतमन्वाहार्य मभ-क्तमपश्यत् तमात्मन्नधत्त स वा एष प्राजापत्यो यदन्वाहार्यो यस्यैवव्विँदुषोऽन्वाहार्य आह्रि-यते साख्षादेव प्रजापतिमृद्ध्नोत्यपरिमितोनिरुप्योऽपरिमितः प्रजापतिः प्रजापते ॥ [१२] ॥ रात्यै देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एतम्प्राजापत्यमन्वाहार्य मपश्यन् तमन्वा-हरन्त ततो देवा अभवन् पराऽसुरा यस्यैवव्विँदुषोऽन्वाहार्य आह्रियते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति यज्ञेन वा इष्टी पक्वेन पूर्ती यस्यैवव्विँदुषोऽन्वाहार्य आह्रियते स त्वेवेष्टापूर्ती प्रजापतेर्भागोऽसी ॥ [१३] ॥ त्याह प्रजापतिमेव भागधेयेन समर्द्धयत्यूर्जस्वान् पयस्वानि-त्याहोर्जमेवास्मिन् पयो दधाति प्राणापानौ मे पाहि समानव्यानौ मे पाहीत्याहाऽऽशिषमेवैतामा शास्तेऽख्षितोऽस्यख्षित्यै त्वा मा मे ख्षेष्ठा अमुत्रामुष्मिँल्लोक इत्याह ख्षीयते वा अमुष्मि-ल्लोँकेऽन्न मितःप्रदानङ्ग् ह्यमुष्मिँल्लोके प्रजा उपजीवन्ति यदेवमभिमृशत्यख्षितिमेवैनद् गमयति नास्यामुष्मिँल्लोकेऽन्नङ्ख्षीयते ॥ [१४] ॥

(अन्वाहार्येणप्रजापतेरसिह्यमुष्मिँल्लोकेपञ्चदश च) ॥ ३ ॥

बर्हिषोऽहन्देवयज्यया प्रजावान् भूयासमित्याह बर्हिषा वै प्रजापतिः प्रजा असृजत तेनैव प्रजाः सृजते नराशꣳसस्याहन्देवयज्यया पशुमान् भूयासमित्याह नराशꣳसेन वै प्रजापतिः पशूनसृजत तेनैव पशून्थ् सृजतेऽग्नेः स्विष्टकृतोऽहन्देवयज्ययाऽऽयुष्मान्यज्ञेन प्रतिष्ठाङ्गमेय-मित्याहाऽऽयुरेवात्मन् धत्ते प्रति यज्ञेन तिष्ठति दर्शपूर्णमासयोर् ॥ [१५] ॥ वै देवा उज्जि-तिमनूदजयन् दर्शपूर्णमासाभ्या मसुरानपानुदन्ताग्नेरहमुज्जितिमनूज्जेष मित्याह दर्शपूर्णमा-सयोरेव देवतानाय्यँजमान उज्जितिमनूज्जयति दर्शपूर्णमासाभ्याम्भ्रातृव्यानप नुदते वाजवती-भ्याव्वँ्यूहत्यन्नव्वै वाजोऽन्नमेवाव रुन्धे द्वाभ्याम्प्रतिष्ठित्यै यो वै यज्ञस्य द्वौ दोहौ विद्वान् यजत उभयत ॥ [१६] ॥ एव यज्ञन्दुहे पुरस्ताच्चोपरिष्टाच्चैष वा अन्यो यज्ञस्य दोह इडायामन्यो यर्हि होता यजमानस्य नाम गृह्णीयात् तर्हि ब्रूयादेमा अग्मन्नाशिषो दोहकामा इति सङ्ग्स्तुता

ए॒व दे॒वता॑ दु॒हेऽथो॑ उ॒भय॑त ए॒व य॒ज्ञन्दु॑हे पु॒रस्ता᳚च्चो॒परि॑ष्टाच्च॒ रोहि॑तेन त्वा॒ऽग्निर्दे॒वता᳚ङ्गमय॒त्वि-
त्या॑है॒ते वै दे॑वा॒श्वा ॥ [१७] ॥ यज॑मानः प्रस्त॒रो यदे॒तैः प्र॑स्त॒रम्प्र॒हर॑ति दे॒वा॒श्वैरे॒व यज॑मानꣳ
सु॒व॒र्गँल्लो॒कङ्ग॑मयति॒ वि ते॑ मुञ्चामि रश॒ना वि र॒श्मीनित्या॑है॒ष वा अ॒ग्नेर्वि॑मो॒कस्ते॒नै॒वै॒नँ॒व्विमु॑ञ्चति॒
विष्णो᳚ः श॒य्ँयोर॑ह॒न्दे॑व॒य॒ज्यया॑ य॒ज्ञेन॑ प्रति॒ष्ठाङ्ग॑मे॒यमित्या॑ह य॒ज्ञो वै विष्णु॑र् य॒ज्ञ ए॒वान्त॒तः प्रति॑
ति॒ष्ठति॒ सोम॑स्या॒हन्दे॑व॒य॒ज्यया॑ सु॒रेता॒ ॥ [१८] ॥ रेतो॑ धिषी॒येत्या॑ह॒ सोमो॒ वै रे॑तो॒धास्ते॒नै॒व रेत॑
आ॒त्मन् ध॑त्ते॒ त्वष्टु॑र॒हन्दे॑व॒य॒ज्यया॑ प॒शू॒नाꣳ रू॒पम्पु॑षे॒यमित्या॑ह॒ त्वष्टा॒ वै प॑शू॒नाम्मि॑थु॒नाना॑ꣳ रू॒प-
कृ॒त्ते॒नै॒व प॑शू॒नाꣳ रू॒पमा॒त्मन् ध॑त्ते दे॒वाना॒म्पत्नी॑र॒ग्निर् गृ॒हप॑तिर् य॒ज्ञस्य॑ मिथु॒नन्तयो॑र॒हं दे॑व॒य-
ज्यया॑ मिथु॒नेन॒ प्रभू॑यास॒मित्या॑है॒तस्मा॑द् वै मि॑थु॒नात् प्र॒जाप॑तिर् मिथु॒नेन॒ ॥ [१९] ॥ प्राजा॑यत॒
तस्मा॑दे॒व यज॑मानो मिथु॒नेन॒ प्रजा॑यते वे॒दो॑ऽसि॒ वित्ति॑रसि वि॒देयेत्या॑ह वे॒दे॒न वै दे॒वा असु॑राणाँ॒व्वि-
त्तँ॒व्वेद्य॑मविन्दन्त॒ तद्वे॒दस्य॑ वेद॒त्वँय्यद्य॒द् भ्रातृ॑व्यस्याभि॒ध्याये॒त् तस्य॒ नाम॑ गृह्णीया॒त् तदे॒वास्य॒
सर्वँ॑व्वृङ्क्ते घृ॒तव॑न्तङ्कु॒ला॒यिन॑ꣳ रा॒यस्पोष॑ꣳ सह॒स्रिण॑ँव्वे॒दो द॑दातु वा॒जिन॒मित्या॑ह॒ प्रस॑हस्र॒म्प॒शूना᳚-
प्नो॒त्या स्य॑ प्र॒जाया᳚ँव्वा॒जी जा॑यते॒ य ए॒वँव्वेद॑ ॥ [२०] ॥

(द॒र्॒श॒पू॒र्णमा॒सयो॑रुभ॒यतो॑दे॒वा॒श्वाःसु॒रेता᳚ःप्र॒जाप॑तिर् मिथु॒नेना᳚प्नो॒त्यष्टौ च॑)    ॥ ४ ॥

ध्रु॒वाँ॒व्वै रिच्य॑मानाँ॒य्य॒ज्ञोऽनु॑ रिच्यते य॒ज्ञँय्यज॑मानो॒ यज॑मानम्प्र॒जा ध्रु॒वामा॒प्याय॑मानाँ॒य्य॒-
ज्ञोऽन्वा प्या॑यते य॒ज्ञँय्यज॑मानो॒ यज॑मानम्प्र॒जा आ प्या॑यताम्ध्रु॒वा घृ॒तेनेत्या॑ह ध्रु॒वामे॒वाऽऽप्या॑-
यय॒ति॒ तामा॒प्याय॑मानाँ॒य्य॒ज्ञोऽन्वा प्या॑यते य॒ज्ञँय्यज॑मानो॒ यज॑मानम्प्र॒जाः प्र॒जाप॑तेर् वि॒भा-
न्नाम॑ लो॒कस्तस्मि॑ꣳस्त्वा दधामि स॒ह यज॑माने॒नेत्या॑ ॥ [२१] ॥ हा॒यँ॑व्वै प्र॒जाप॑तेर् वि॒भान्नाम॑
लो॒कस्तस्मि॑न्ने॒वै॑नन्दधाति स॒ह यज॑माने॒न रिच्य॑त इ॒व वा ए॒तद्यद्यज॑ते॒ यद्य॑जमानभा॒गम्प्रा॒श्ञा-
त्या॒त्मान॑मे॒व प्री॑णात्ये॒तावा॒न्वै य॒ज्ञो यावा॑न्यजमानभा॒गो य॒ज्ञो यज॑मानो॒ यद्य॑जमानभा॒गम्प्रा॒-
श्ञाति॑ य॒ज्ञ ए॒व य॒ज्ञं प्रति॑ ष्ठापयत्ये॒तद्वै सू॒यव॑स॒ꣳ॒ सोद॑क॒य्ँय॒द्बर्॒हिश्चाऽऽप॑श्चै॒तद् ॥ [२२] ॥
यज॑मानस्या॒ऽऽयत॑न॒य्ँयद्वे॒दिर्य॑त् पू᳚र्णपा॒त्रम॒न्तर्वे॑दि नि॒नय॑ति॒ स्व ए॒वाऽऽय॑तने सू॒यव॑स॒ꣳ॒ सोद॑-
कङ्कुरु॒ते सद॑सि॒ सन्मे॑ भूया॒ इत्या॒हाऽऽपो॒ वै य॒ज्ञ आपो॒ऽमृत॑य्ँय॒ज्ञमे॒वामृत॑मा॒त्मन् ध॑त्ते॒ सर्वा॑णि॒
वै भू॒तानि॑ व्र॒तमु॑पय॒न्त॒ मनू॑प यन्ति॒ प्राच्या᳚न्दि॒शि दे॒वा ऋ॒त्विजो॑ मार्जयन्ता॒मित्या॑है॒ष वै द॒र्॒श-

पूर्णमासयोरवभृथो ॥ [२३] ॥ यान्येवैनम्भूतानि व्रतमुपयन्तमनूपयन्ति तैरेव सहावभृथमवैति विष्णुमुखा वै देवा श्छन्दोभिरिमाँल्लोकाननपजय्यमभ्यजयन्यद्विष्णुक्रमान् क्रमते विष्णुरेव भूत्वा यजमानश्छन्दोभिरिमाँल्लोकाननपजय्यमभि जयति विष्णोः क्रमोऽस्यभिमातिहेत्याह गायत्री वै पृथिवी त्रैष्टुभमन्तरिक्षञ्जागती द्यौरानुष्टुभीर् दिश श्छन्दोभिरेवेमाँल्लोकान्यथापूर्वमभि जयति ॥ [२४] ॥

(यजमानेनेतिचै तदवभृथोदिशःसप्त च) ॥ ५ ॥

अगन्म सुवः सुवरगन्मेत्याह सुवर्गमेव लोकमेति सन्दृशस्ते मा छित्सि यत्ते तपस्तस्मै ते माऽऽवृक्षीत्याह यथायजुरेवैतथ् सुभूरसि श्रेष्ठो रश्मीनामायुर्द्धा अस्यायुर्मे धेहीत्याहाऽऽशिषमेवैतामा शास्ते प्र वा एषोऽस्माँल्लोकाच्च्यवते यो ॥ [२५] ॥ विष्णुक्रमान् क्रमते सुवर्गाय हि लोकाय विष्णुक्रमाः क्रम्यन्ते ब्रह्मवादिनो वदन्ति स त्वै विष्णुक्रमान् क्रमेत य इमाँल्लोकान् भ्रातृव्यस्य संविद्य पुनरिमँल्लोकम्प्रत्यवरोहेदित्येष वा अस्य लोकस्य प्रत्यवरोहो यदाहेदमहममुं भ्रातृव्यमाभ्यो दिग्भ्योऽस्यै दिव इतीमानेव लोकान् भ्रातृव्यस्य संविद्य पुनरिमँल्लोकं प्रत्यवरोहति सं ॥ [२६] ॥ ज्योतिषाऽभूवमित्याहास्मिन्नेव लोके प्रति तिष्ठत्यैन्द्रीमावृतमन्वावर्त इत्याहासौ वा आदित्य इन्द्रस्तस्यैवाऽऽवृतमनु पर्यावर्तते दक्षिणा पर्यावर्तते स्वमेव वीर्यमनु पर्यावर्तते तस्माद् दक्षिणोऽर्द्ध आत्मनो वीर्यावत्तरोऽथो आदित्यस्यैवाऽऽवृतमनु पर्यावर्तते समहम्प्रजया सम्मया प्रजेत्याहाऽऽशिष ॥ [२७] ॥ मेवैतामा शास्ते समिद्धो अग्ने मे दीदिहि समेद्धा ते अग्ने दीद्यासमित्याह यथायजुरेवैतद्वसुमान्यज्ञो वसीयान् भूयासमित्याहाऽऽशिषमेवेतामा शास्ते बहु वै गार्हपत्यस्यान्ते मिश्रमिव चर्यत आग्निपावमानीभ्याङ्गार्हपत्यमुप तिष्ठते पुनात्येवाग्निम्पुनीत आत्मानन्द्वाभ्यां प्रतिष्ठित्या अग्ने गृहपत इत्याह ॥ [२८] ॥ यथायजुरेवैतच्छतꣳ हिमा इत्याह शतन्त्वा हेमन्तानिन्धिषीयेति वावैतदाह पुत्रस्य नाम गृह्णात्यन्नादमेवैनङ्करोति तामाशिषमा शासे तन्तवे ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रोऽजातः स्यात् तेजस्व्येवास्य ब्रह्मवर्चसी पुत्रो जायते तामाशिषमा शासेऽमुष्मै ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रो ॥ [२९] ॥ जातः स्यात्तेज एवास्मिन् ब्रह्मवर्चसन्दधाति यो वै यज्ञम्प्रयुज्य न विमुञ्च-

त्यप्रतिष्ठानो वै स भवति कस्त्वा युनक्ति स त्वा वि मुञ्चत्वित्याह प्रजापतिर् वै कः प्रजापति-
नैवैनंय्युँनक्ति प्रजापतिना वि मुञ्चति प्रतिष्ठित्या ईश्वरव्वैँ व्रतमविसृष्टम्प्रदहोऽग्ने व्रतपते व्रतम-
चारिषमित्याह व्रतमेव ॥ [३०] ॥ वि सृजते शान्त्या अप्रदाहाय पराङ्वाव यज्ञ एति न नि
वर्तते पुनर्यो वै यज्ञस्य पुनरालम्भव्विँद्वान्यजते तमभि नि वर्तते यज्ञो बभूव स आ बभूवेत्याहैष
वै यज्ञस्य पुनरालम्भस्तेनैवैनम्पुनरा लभतेऽनवरुद्धा वा एतस्य विराड् य आहिताग्निः सन्नसभः
पशवः खलु वै ब्राह्मणस्य सभेष्ट्वा प्राङुत्क्रम्य ब्रूयाद् गोमाꣳ अग्नेऽविमाꣳ अश्वी यज्ञ इत्यव
सभाꣳ रुन्धे प्र सहस्रम्पशूनाप्नोत्याऽस्य प्रजायाव्वाँजी जायते ॥ [३१] ॥

(चतुर्विꣳशतिश्च) ॥ ६ ॥

देव सवितः प्र सुव यज्ञम्प्र सुव यज्ञपतिम्भगाय दिव्यो गन्धर्वः। केतपूः केतन्नः पुनातु वाच-
स्पतिर् वाचमद्य स्वदाति नः॥ इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्त्वयाऽयव्वृँत्रव्वँध्यात्॥ वाजस्य नु
प्रसवे मातरम्महीमदितिन्नाम वचसा करामहे। यस्यामिदव्विँश्वम्भुवनमाविवेश तस्यान्नो देवः
सविता धर्म साविषत्॥ अप्स्व ॥ [३२] ॥ न्तरमृतमप्सु भेषजमपामुत प्रशस्तिष्वश्वा भवथ
वाजिनः॥ वायुर् वा त्वा मनुर् वा त्वा गन्धर्वाः सप्तविꣳशतिः। ते अग्रे अश्वमायुञ्जन्ते अस्मिञ्ज-
वमाऽदधुः॥ अपान्नपादाशुहेमन्य ऊर्मिः ककुद्मान् प्रतूर्तिर् वाजसातमस्तेनायव्वाँजꣳ सेत्॥
विष्णोः क्रमोऽसि विष्णोः क्रान्तमसि विष्णोर् विक्रान्तमस्यङ्कौ न्यङ्का वभितो रथय्यौँ ध्वान्त-
व्वाँताग्रमनु सञ्चरन्तौ दूरेहेतिरिन्द्रियावान् पतत्री ते नोऽग्नयः पप्रयः पारयन्तु ॥ [३३] ॥

(अप्सुन्यङ्कौपञ्चदश च) ॥ ७ ॥

देवस्याहꣳ सवितुः प्रसवे बृहस्पतिना वाजजिता वाजञ्जेषन्देवस्याहꣳ सवितुः प्रसवे बृहस्प-
तिना वाजजिता वर्षिष्ठन्नाकꣳ रुहेयमिन्द्राय वाचव्वँदतेन्द्रं वाजञ्जापयतेन्द्रो वाजमजयित्॥
अश्वाजनि वाजिनि वाजेषु वाजिनीवत्यश्वान्थ्समत्सु वाजय॥ अर्वाऽसि सप्तिरसि वाज्यसि
वाजिनो वाजन्धावत मरुताम्प्रसवे जयत वि योजना मिमीद्ध्वमद्ध्वनः स्कभ्नीत ॥ [३४] ॥

काष्ठाङ्गच्छत वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः॥ अस्य मद्ध्वः पिबत मादयद्ध्वन्तृप्ता यात पथिभिर् देवयानैः॥ ते नो अर्वन्तो हवनश्रुतो हवँव्विश्वे शृण्वन्तु वाजिनः॥ मितद्रवः सहस्रसा मेधसाता सनिष्यवः। महो ये रत्नꣳ समिथेषु जभ्रिरे शन्नो भवन्तु वाजिनो हवेषु॥ देवताता मितद्रवः स्वर्काः। जंभयन्तोऽहिँव्वृकꣳ रख्षाꣳसि सनेम्य-स्मद्युयव ॥ [३५] ॥ न्नमीवाः॥ एष स्य वाजी ख्षिपणिन्तुरण्यति ग्रीवायाम्बद्धो अपिकख्ष आसनि। क्रतुन्दधिक्रा अनु सन्तवीत्वत् पथामङ्काꣳस्यन्वापनीफणत्॥ उत स्मास्य द्रवतस्तु-रण्यतः पर्णन्न वेरनु वाति प्रगर्द्धिनः। श्येनस्येव ध्रजतो अङ्कसम्परि दधिक्राव्ण्णः सहोर्जा तरित्रतः॥ आ मा वाजस्य प्रसवो जगम्यादा द्यावापृथिवी विश्वशंभू। आ मा गन्ताम्पि-तरा ॥ [३६] ॥ मातरा चाऽऽमा सोमो अमृतत्वाय गम्यात्॥ वाजिनो वाजजितो वाजꣳ सरिष्यन्तो वाजञ्जेष्यन्तो बृहस्पतेर् भागमव जिघ्रत वाजिनो वाजजितो वाजꣳ ससृवाꣳसो वाजञ्जिगिवाꣳसो बृहस्पतेर् भागे नि मृड्ढमियँव्वः सा सत्या सन्धाभूद् यामिन्द्रेण समधद्ध्व-मजीजिपत वनस्पतय इन्द्रँव्वाजँव्वि मुच्यद्ध्वम् ॥ [३७] ॥

(स्कन्नीतयुयवन्पितराद्विचत्वारिꣳशच्च) ॥ ८ ॥

ख्षत्रस्योल्ꣳमसि ख्षत्रस्य योनिरसि जाय एहि सुवो रोहाव रोहाव हि सुवरहन्नावु-भयोः सुवो रोख्ष्यामि वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्द्धा च व्यश्नियश्चाऽऽन्त्या-यन श्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च। आयुर् यज्ञेन कल्पताम्प्राणो यज्ञेन कल्पताम-पानो ॥ [३८] ॥ यज्ञेन कल्पताँव्व्यानो यज्ञेन कल्पताञ्चख्षुर् यज्ञेन कल्पताꣳ श्रोत्रँय्यज्ञेन कल्पताम्मनो यज्ञेन कल्पताँव्वाग् यज्ञेन कल्पतामात्मा यज्ञेन कल्पताँय्यज्ञो यज्ञेन कल्पताꣳ सुवर् देवाꣳ अगन्मामृता अभूम प्रजापतेः प्रजा अभूम समहं प्रजया सम्मया प्रजा समहꣳ रायस्पोषेण सम्मया रायस्पोषोऽन्नाय त्वाऽन्नाद्याय त्वा वाजाय त्वा वाजजित्यायै त्वाऽमृतमसि पुष्टिरसि प्रजननमसि ॥ [३९] ॥

(अपानोवाजायनव च) ॥ ९ ॥

वाजस्येमम्प्रसवः सुषुवे अग्रे सोमꣳ राजानमोषधीष्वप्सु। ता अस्मभ्यम्मधुमतीर् भवन्तु वयꣳ राष्ट्रे जाँग्रियाम पुरोहिताः। वाजस्येदम्प्रसव आ बभूवेमा च विश्वा भुवनानि सर्वतः। स विराजम्पर्यैति प्रजानन् प्रजाम्पुष्टिँव्वर्द्धयमानो अस्मे। वाजस्येमाम्प्रसवः शिश्रिये दिवमिमा च विश्वा भुवनानि सम्राट्। अदित्सन्तन्दापयतु प्रजानन् रयिं ॥ [४०] ॥ च नः सर्ववीरान्नि यच्छतु॥ अग्ने अच्छा वदेह नः प्रति नः सुमना भव। प्र णो यच्छ भुवस्पते धनदा असि नस्त्वम्॥ प्र णो यच्छत्वर्यमा प्र भगः प्र बृहस्पतिः। प्र देवाः प्रोत सूनृता प्र वाग् देवी ददातु नः॥ अर्यमणम्बृहस्पतिमिन्द्रन्दानाय चोदय। वाचँव्विष्णुꣳ सरस्वतीꣳ सवितारं ॥ [४१] ॥ च वाजिनम्॥ सोमꣳ राजानँव्वरुणमग्निमन्वारभामहे। आदित्यान् विष्णुꣳ सूर्यम्ब्रह्माणञ्च बृहस्पतिम्॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर् बाहुभ्याम्पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर् यन्त्रेणाग्नेस्त्वा साम्राज्येनाभिषिञ्चामीन्द्रस्य बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चामि ॥ [४२] ॥

(रयिꣳसवितारꣳषड्विꣳशच्च) ॥ १० ॥

---

अग्निरेकाक्षरेण वाचमुदजयदश्विनौ द्व्यक्षरेण प्राणापानावुदजयताँव्विष्णुस्त्र्यक्षरेण त्रीँल्लोकानुदजयथ् सोमश्चतुरक्षरेण चतुष्पदः पशूनुदजयत् पूषा पञ्चाक्षरेण पङ्क्तिमुदजयद् धाता षडक्षरेण षडृतूनुदजयन् मरुतः सप्ताक्षरेण सप्तपदाꣳ शक्करीमुदजयन् बृहस्पतिर्-ष्टाक्षरेण गायत्रीमुदजयन् मित्रो नवाक्षरेण त्रिवृतꣳ स्तोममुदजयद् ॥ [४३] ॥ वरुणो दशाक्षरेण विराजमुदजयदिन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयद् विश्वे देवा द्वादशाक्षरेण जगतीमुदजयन् वसवस्त्रयो दशाक्षरेण त्रयोदशꣳ स्तोममुदजयन् रुद्राश्चतुर्दशाक्षरेण चतुर्दशꣳ स्तोममुदजयन्नादित्याः पञ्चदशाक्षरेण पञ्चदशꣳ स्तोममुदजयन्नदितिः षोडशाक्षरेण षोडशꣳ स्तोममुदजयत् प्रजापतिः सप्तदशाक्षरेण सप्तदशꣳ स्तोममुदजयत् ॥ [४४] ॥

(त्रिवृतꣳ स्तोममुदजयथ्षट्चत्वारिꣳशच्च) ॥ ११ ॥

---

उपयामगृहीतोऽसि नृषदन्त्वा द्रुषदम्भुवनसदमिन्द्राय जुष्टङ्गृह्णाम्येष ते योनिरिन्द्राय त्वोपयामगृहीतोऽस्यप्सुषदन्त्वा घृतसदँव्योमसदमिन्द्राय जुष्टङ्गृह्णाम्येष ते योनिरिन्द्राय त्वोपया-

मगृहीतोऽसि पृथिविषदन्त्वाऽन्तरिक्षसदन्नाकसदमिन्द्राय जुष्टङ्गृह्णाम्येष ते योनिरिन्द्राय त्वा॥ ये ग्रहाः पञ्चजनीना येषान्तिस्रः परमजाः। दैव्यः कोशः ॥ [४५] ॥ समुब्जितः। तेषाव्ँविशिप्रियाणामिषमूर्जꣳ समग्रभीमेष ते योनिरिन्द्राय त्वा॥ अपाꣳ रसमुद्वयसꣳ सूर्यरश्मिꣳ समाभृतम्। अपाꣳ रसस्य यो रसस्तव्ँवो गृह्णाम्युत्तममेष ते योनिरिन्द्राय त्वा॥ अया विष्ठा जनयन् कर्वराणि स हि घृणिरुरुर् वराय गातुः। स प्रत्युदैद् धरुणो मद्ध्वो अग्रꣳ स्वायाय्ँयत् तनुवान्तनूमैरयत। उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टङ्गृह्णाम्येष ते योनिः प्रजापतये त्वा ॥ [४६] ॥

(कोशस्तनुवांत्रयोदश च) ॥ १२ ॥

---

अन्वह मासा अन्विद्वनान्यन्वोषधीरनु पर्वतासः। अन्विन्द्रꣳ रोदसी वावशाने अन्वापो अजिहत जायमानम्॥ अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये। अनु क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये॥ इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम्। न ह्यस्या अपरञ्चन जरसा ॥ [४७] ॥ मरते पतिः॥ नाहमिन्द्राणि रारण सख्युर् वृषाकपेर्ऋते। यस्येदमप्यꣳ हविः प्रियन्देवेषु गच्छति॥ यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत्। यस्य शुष्माद्रोदसी अभ्यसेतान्नृम्णस्य मह्ना स जनास इन्द्रः॥ आ ते मह इन्द्रोत्युग्र समन्यवो यथ् समरन्त सेनाः। पताति दिद्युन्नर्यस्य बाहुवोर् मा ते ॥ [४८] ॥ मनो विष्वद्रियग् वि चारीत्॥ मा नो मर्द्धीरा भरा दद्धि तन्नः प्र दाशुषे दातवे भूरि यत् ते। नव्ये देष्णे शस्ते अस्मिन् त उक्थे प्र ब्रवाम वयमिन्द्र स्तुवन्तः॥ आ तू भर माकिरेतत् परि ष्ठाद् विद्मा हि त्वा वसुपतिव्ँवसूनाम्। इन्द्र यत् ते माहिनन्दत्रमस्त्यस्मभ्यन्तद्धर्यश्व ॥ [४९] ॥ प्र यन्धि॥ प्रदातारꣳ हवामह इन्द्रमा हविषा वयम्। उभा हि हस्ता वसुना पृणस्वाऽऽप्र यच्छ दक्षिणादोत सव्यात्॥ प्रदाता वज्री वृषभस्तुराषाड्छुष्मी राजा वृत्रहा सोमपावा। अस्मिन्यज्ञे बर्हिष्या निषद्याथा भव यजमानाय शय्ँयोः॥ इन्द्रः सुत्रामा स्ववाꣳ अवोभिः सुमृडीको भवतु विश्ववेदाः। बाधतान्द्वेषो अभयङ्कृणोतु सुवीर्यस्य ॥ [५०] ॥ पतयः स्याम॥ तस्य वयꣳ सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम। स सुत्रामा स्ववाꣳ इन्द्रो अस्मे आराच्चिद्द्वेषः सनुतर् युयोतु॥ रेवतीर् नः सधमाद्

इन्द्रे॑ सन्तु तु॒विवा॑जाः। क्षु॒मन्तो॒ याभि॒र् मदे॑म॥ प्रोष्व॑स्मै पु॒रोर॒थमिन्द्रा॑य शू॒षम॑र्चत। अ॒भीके॑
चिदु लोक॒कृथ् स॒ङ्गे स॒मथ्सु॑ वृ॒त्रहा। अ॒स्माक॑म्बोधि चोदि॒ता नभ॑न्तामन्य॒केषा᳚म्। ज्या॒का अधि॒
धन्व॑सु ॥ [५१] ॥

(ज॒रसा॒मा ते॑हर्यश्वसु॒वीर्य॒स्याद्ध्येक॑ञ्च) ॥ १३ ॥

---

## समाप्ति कोर्वैः

(पा॒क॒य॒ज्ञꣳसꣳश्र॑वाःप॒रोख्षं॑ब॒र्‌हि॒षो॒ऽहं ध्रु॒वाम॒ग॒न्मेत्या॑ह॒ देव॑ सवित॒र्दे॒वस्या॒हंख्ष॒त्रस्यो॒लꣳवाज॑स्ये॒मम॒ग्निरेका᳚ख्षरेणो पया॒मगृ॑हीतो॒ऽस्यन्वह॒ मासा॒स्त्रयो॑दश)
(पा॒क॒य॒ज्ञंप॒रोख्षं॑ध्रु॒वांवि सृ॑जतेच न॒ः सर्व॑वीरा॒ं पत॑यः स्यो॒मैक॑पञ्चा॒शत्)
(पा॒क॒य॒ज्ञंधन्व॑सु॒)

॥ हरिः ॐ ॥

प्रथमकाण्डे सप्तमः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| १३ | ५१ |

ॐ